**International Journal of Research in Social Sciences**
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# श्रीमद्भगवद्गीतायां गुरुशिष्यसम्प्रत्यया:

## डॉ धनंजय मिश्र:

### प्राचार्य:, श्री माता वैष्णो देवी (स्नातक) गुरुकुलम्, कटरा (जम्मूकश्मीर:)

प्रत्येकस्मिन् बालके जन्मनैव काचन जन्मजातप्रवृत्तयः भवन्ति । यथा बालकः वातावरणेन सह सम्बन्धं स्थापयति तथा तस्य जन्मजातशक्तयः विकसन्ति । अतः शिक्षाया अर्थः बालकस्य जन्मजातशक्तीनामन्तः बहिः विकासमस्ति । निष्कर्षरूपेण शिक्षाया अर्थः बालकस्य जन्मजातशक्तीनां सर्वांगीण विकासः ।

**शिक्षाया: सामग्रयः** -"शिक्षा सामग्री" इत्यन्तर्गतं चत्वारि घटकानि समायान्ति । १. बालकः २. वंशानुक्रमः, ३. वातावरणम् ४. समयः

शिक्षया मानवान्तर्निहितानां शक्तीनां गुणानाञ्च दिग्दर्शनं भवति तथा शिक्षाया: सहायतां विना येषां अन्तर्बहिर्निष्क्रमणमसम्भवमस्ति l

शिक्षा एका गतिशीला प्रक्रियास्ति, परिस्थितीनामनुसारं प्रगतिपथमग्रसारयति । या बालकं सदैव देश-काल-प्रभावयति, येन तद्व्यवहारे परिवर्तनं जायते |

शिक्षा एका द्विमुखी प्रक्रियास्ति यस्यामेकं व्यक्तित्वमन्यं व्यक्तित्वं च भवत:। एडम्स महोदयानुसारेण एतस्याः प्रक्रियायाः द्वौ बिन्दू भवतः, शिक्षकः बालकश्च |

शिक्षा एका त्रिमुखी प्रक्रियाऽस्ति - जानडीवीमहोदयानुसारमस्य त्रयः बिन्दवः भवन्ति शिक्षकः बालकं पाठ्यक्रमश्च ।

वेदान्तदर्शनानुसारं शिक्षायाः मुख्यमुद्देश्यं भवति, ब्रह्मसाक्षात्कारः । एवञ्च **"विद्ययाऽमृतमश्नुते"** इति ( ईशावास्योपनिषद् -११) वाक्ये विद्याशब्देन परब्रह्मविद्या एव विवक्षिता । औपनिषद्दर्शनानुसारं परब्रह्मविद्यया (आत्मज्ञानेनैव) परमपुरुषार्थस्य मोक्षस्य प्राप्तिः भवति । तस्यां मोक्षप्राप्तौ सहायकः, मार्गदर्शकश्च गुरु एव प्रमुखः भवति । यो ह्याचारं ग्राहयति, छात्रोपयोगिविषयान् संगृह्णाति छात्रबुद्धिं विकासयति च । उक्तञ्च निरुक्ते-

**आचार्यः कस्मात् ? आचार्य आचारं ग्राहयति आचिनोत्यर्थान् । आचिनोति बुद्धिमिति वा (निरुक्त. १.४)**

अथर्ववेदे त्वाचार्यो मृत्युर्वरुणः सोम इत्युच्यते । यथा- **आचार्य मृत्युर्वरुणः सोम ओषधयः पयः (अथर्व ११.५.१४)** | अन्यच्च-

**आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते। (अथर्व ११.५.१७)** गुरुः विविधविद्यानां ज्ञानाद् वाचस्पतिरित्याख्यां जगाम । यथा- **पुनरेहि वाचस्पते देवेन मनसा सह। (अथर्व १.१.२) वाचस्पतिर्नि यच्छतु मय्येवास्तु मयि श्रुतम्। (अथर्व. १.१.३ )**

आचार्येण ब्रह्मज्ञानिना भूयते। अतश्छात्राः गुरुं निकषा ब्रह्मज्ञानप्राप्तये गच्छेयुरिति मुण्डकोपनिषद्युक्तम्-

**तद्धि ज्ञानार्थं स गुरुमेवाधिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् (मुण्डको १.१.१२)**

आचार्यस्य लक्षणं प्रतिपादयताथर्ववेदे प्रोक्तम्- उपनीयं तु यः शिष्यं वेदमध्यापयेद्द्विजः । सङ्कल्पं सरहस्यञ्च तमाचार्य प्रचक्षते (अथर्व.) | ग्रन्थानामनुशीलनेन ज्ञायते यत् प्राचीने काले शिक्षायां गुरोर्महत्वमधिकमासीत् । गुरुः शैक्षिकोद्देश्यानां प्रपूरकः, पूर्वसहायकश्च भवति स्म । अधुनास्माभिश्चिन्तनीयः विषयः, यत् गीतायां कानि शैक्षिकोद्देश्यानि सन्ति ? यैरुद्देश्यैश्छात्राणां पाठ्यक्रमाणाधाररूपेण, लक्ष्यनिर्धारणरूपेण वा कथं सर्वाङ्गिण विकासः स्यादिति ।

तत्राप्रथममस्माभिविभाजितानि श्रीमद्भगवद्गीतोपनिषदः शैक्षिकोद्देश्यानि त्रिधा, गुरुत्वसम्प्रत्ययरूपात्मकानि शिष्यत्वसम्प्रत्यय-रूपात्मकानि गुरुशिष्यसम्बन्धरूपात्मकानि च । अतोऽत्रास्माभिः प्रथमः विभागः गीतागतशैक्षिकोद्देश्यसन्दर्भे समीक्ष्यते।

## (अ) गुरुत्वसम्प्रत्ययः

गुरुत्वसम्प्रत्यये तेषां बिन्दूनां समीक्षा करिष्यते, ये बिन्दवः गीतागत शैक्षिकोद्देश्य-सन्दर्भे गुरुत्वविषये समुपस्थिताः । श्रेष्ठगुरोः प्रशंसाविषये कालिदासेनाप्युक्तम्-

**श्लिष्टा क्रिया कस्यचिदात्मसंस्था, संक्रान्तिरन्यस्य विशेषयुक्ता ।**

**यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव ।। (मालविकाग्निमित्रम्)**

### १. नैतिकोद्देश्यानि

जनसामान्याय श्रीमद्भगवद्गीतायां भगवता कृष्णेन अर्जुनाय, अप्रत्यक्षतः, च बहवः नीतिपरका उपदेशाः प्रदत्ताः । भगवता श्रीकृष्णेनोक्तमर्जुनाय यत् त्वं गतानां विषये चिन्तां मा कुरु यतः पण्डिताः नानुशोचन्ति । यथा-

**अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे। गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ।। गीता. २.११**

**International Journal of Research in Social Sciences**
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

व्यवसायात्मिकां बुद्धिमुपयुज्यता कृष्णेन स्वशिष्यः सम्यगवबोधितः यदर्जुन युद्धं कुरुष्व यदि युद्धे विजयं प्राप्स्यसि चेत् पृथ्वीं भोक्ष्यसे, नो चेत् हतः स्वर्गं तु प्राप्स्यस्येव । यथा-

**हतो वा प्राप्स्यसि स्वर्गं जित्वा वा मोक्ष्यसे महीम् । तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ।। गीता २.३७**

अत्र नैतिकोद्देश्येण श्लोकौ स्वभावान् भावयन्ता इव दृश्येते । शैक्षिकोद्देश्यरूपेण यदि श्लोकौ चिन्तयामस्तदा प्रथमे बालकेभ्यः पुनर्बलनम्, तेषां हृदिष्वात्मविश्वासस्थापनं, अग्रिमकार्याय प्रोत्सनमित्यादिगुणाः परिपूर्णाः। द्वितीयच कथं बालकेभ्यः वयं लाभालाभादीनां ज्ञानं कारयित्वा लोभादिकं दत्वा तेभ्य उचितमार्गादीनां परामर्शः दद्म इत्यादिभावैः पूर्णः श्लोकः नैतिकीं शिक्षां प्रददाति । एकेन गुरुणा तादृशः एव भाव्यः यः छात्रेभ्यः नीत्युपदेशान् ददन् तेषां पन्थानः प्रशस्तान् कुर्यात् ।

**२. शारीरिक मानसिकोद्देश्यानि -**

श्रीमद्भगवद्गीतया मानसिकशारीरिकोद्देश्यानामपि पूर्तिः समुचितरूपेण सम्पद्यते । कथं विहारः करणीयः, शरीराय स्वस्थतायै वा किमुचितं किं वानुचितमिति गीतायां एतद् ज्ञानं प्राप्यते । वासुदेवः अर्जुनं भाषते यत्-

**'युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु । युक्तस्वप्नावबोधस्य योगो भवति दुःखहा । गीता ६.१७**

शारीरिकविकासाय युक्ताहारविहार एव योगः भवति, यश्च योगः दुःखं हरति यतः युक्ताहारविहारी एव इष्टकर्मसु युक्तः भवति तथा इष्टकर्मसु युक्तः एव स्वप्नावबोधे युक्तत्वात् योगी भवितुमर्हति ।

बालकस्य सर्वाङ्गीणविकासे शारीरिकोऽपि विकासः महत्वपूर्णः । अतः गुरुपरिप्रेक्ष्ये शिक्षाया एतदुद्देश्यं स्यात् यत् सा बालकस्य शारीरिके विकासे सहायिनी भवतु ।

**३ व्यावहारिकोद्देश्यानि-**

व्यवहारस्य विज्ञानं मनोविज्ञानं तथा तद्मनोविज्ञानञ्च दर्शनस्याङ्गमस्ति । अतः दर्शनाधारेण शिक्षाया उद्देश्यं व्यावहारिकज्ञानप्रदानमपि भवति । छात्राय तदा व्यावहारिकञ्च ज्ञानं दातुं शिक्षकेन समर्थेन भाव्यम् । व्यावहारिकज्ञानस्य शिक्षां शिक्षकः स्वश्रेष्ठव्यक्तित्वेनाचरणेन च दातुं शक्नोति, येन छात्राणां चारित्रिकोऽपि विकासः स्यात् । एतद्सन्दर्भे कृष्णेनोक्तम्-

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।। गीता ३.२१**

अतः शिक्षकः तादृशव्यक्तित्वसम्पन्नः स्यात् येन छात्रसमुदायरूपी लोकः तदनुवर्तने प्रेरितःस्यात्। शिक्षकस्य कर्तव्यं भवति यत् स बुद्धिभेदं न जनयेत् अपितु कर्मसङ्गिनामज्ञानां सम्प्रत्ययान् स्पष्टयेत्। यथोक्तं-

**न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्।। गीता ३.२६**

शिक्षाया: परमोद्देश्यमस्ति बालकस्य सर्वाङ्गिणविकास:, तदर्थञ्च विकासाय शिक्षकेन सर्वदा प्रयत्नः विधेयः, किन्तु शिक्षाया आधुनिकार्थेषु बालकस्य तस्य चिन्तनस्य तस्य रुचेश्च प्राधान्यमस्ति । अतः शिक्षकेन बालरुचिषु ध्यानं दातव्यम्। एतस्मिन् सन्दर्भे द्रष्टव्यमुदाहरणं तदस्ति यदा उपदेशान्ते श्रीकृष्ण अर्जुनं यथेच्छाचरणायाज्ञापयति। यथा-

**इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया। विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ।। गीता १८.६३**

**४. उदारतायाः उद्देश्यानि-**

एकस्मिन् गुरावुदारताभावनाऽऽवश्यकरूपेण स्यादिति चिन्तनं शिक्षाशास्त्रिणामस्ति । गीतायामप्युदारतासम्बन्धिभावाः विद्यन्ते। यथा-

**अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।। गीता ९.२२**

**पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहतमश्नामि प्रयतात्मनः ।। गीता ९.२६**

**तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ।। गीता १०.११**

प्राचीनकाले गुरौ तादृशी उदारता भवति स्म ययोपकृताश्च्छात्राः ज्ञानार्जनं कुर्वन्ति स्म । उपर्युक्तेषु श्लोकेषु श्रीकृष्ण अर्जुनं कथयति यत् ये मेऽनन्यभक्ताः भवन्ति सर्वदा च मे चिन्तनं कुर्वन्ति तेषां भक्तानामहं योगक्षेमं वहामि ये च भक्ता: मह्यं सश्रद्धया पत्रं, पुष्पं फलं, तोयमित्यादिकं किमपि प्रयच्छन्ति, तदहं भक्तया स्वीकरोमि । ये अज्ञानिनः सन्ति तेषामेवानुकम्पायै, तत्र न मे कश्चन लाभ:, अहं तेषामात्मभावस्थः भास्वता ज्ञानदीपेनाज्ञानजं तमः नाशयामि । आधुनिकस्मिन्नपि शिक्षकेन औदार्ययुक्तेन भाव्यम् तथा च छात्राणामज्ञानजं तमः येन केनापि विधिना नाशनीयम् कालेस्मिन् सर्वेषां जनानां सामाजिकस्थिति: भिन्ना भिन्ना भवति । अतस्तस्मात् छात्राणामपि स्थितिस्तथैव भवति । अतोऽत्र शिक्षकेन ज्ञानप्रदानेन सहैव सामाजिकस्थित्या अनुन्नतानां छात्राणां सहयोगः करणीयः, औदार्यञ्च स्थापनीयम् । येन समाजः उपकृतः स्यात् ।

**५. शरणागतेरुद्देश्यानि -**

धर्मग्रन्थेषु शरणागतिः सर्वोत्तमभक्त्या वर्णितास्ति । यतः शिष्यस्य शरणागत्या तस्य समग्रविकासस्य कर्तव्यं गुरौ आपतति । अतः गुरुणा स्वशरणागतौ आगतस्य शिष्यस्य मार्गदर्शनं करणीयमेव । शरणागतव्याख्यां कुर्वता वासुदेवेनोक्तम्-

**International Journal of Research in Social Sciences**
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

**सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।। गीता. १८.६६**

**मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः । गीता. ९.३४**

**न तद्भासयते सूर्यो न शशाङ्को न पावकः ।यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ।। गीता. १५.६**

तात्पर्यमिदं यत् धर्मस्य ज्ञानेन सहितो रहितो वा त्वं सर्वेषां धर्माणां त्यागं कृत्वा मां शरणं व्रज मा शुचश्च अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि। यदि मां प्राप्तुमीहस्तदा मद्भक्तः मत्परायणश्च भव । मम शरणागतौ आगतेभ्योऽहं स्वधाम्नि स्थानं ददामि यद्गत्वा न केचन निवर्तन्ते। तद्धाम च सूर्यशशाङ्कपावकादयोऽपि प्रकाशने असमर्थाः ।

वर्तमानसन्दर्भेऽपि शिक्षकाः शरणागतौ आगतानां रक्षकाः स्युः । तात्पर्यमिदं यत् यदि छात्राः यां कामपि समस्यामानीय प्रस्तुवन्ति चेत् शिक्षकेन तस्याः समस्यायाः समाधानं विधेयमिति ।

## ब- शिष्यत्वसम्प्रत्ययः

"शासनाच्छिष्य उच्यते" इत्यस्मात् व्युत्पत्तेः "शिष्य इति शब्दः निष्पद्यते । "गुरोर्दोषानाच्छादयतीति छात्रः" इति छात्रशब्दव्युत्पत्तिः । शिष्येण छात्रेण वा ज्ञानार्जनाय बहुपरिश्रमः करणीयः । तथा च तेनैव परिश्रमेण सह तस्मिन् छात्रे आचारव्यवहारादीनामपि ज्ञानमावश्यकं शास्त्रेषूक्तं-

**अहेरिव गणाद् भीत सम्मानात् नरकादिव ।राक्षसीभ्य इव स्त्रीभ्य स विद्यामधिगच्छति । सुभाषित. ।**

विद्यार्थी सर्प इव गणाद्भीतः, सम्मानात् नरक इव भीतः, राक्षसी इव स्त्रीभ्यो भीतः स्याद् तदेव स विद्यामधिगन्तुमर्हति ।

काकचेष्टा इत्यादिभिर्लक्षणयुक्तः विद्यार्थी स्यात् ।

**"काकचेष्टा बकोध्यानं श्वाननिद्रा तथैव च । अल्पाहारी गृहत्यागी विद्यार्थी पञ्चलक्षणम्।।" सुभाषित. ।**

विद्यार्थिन गुणानां ज्ञानेन सहेव तस्य विद्यार्थिनः, दोषाणानामपि ज्ञानमावश्यकं येन सः स्वस्मिन् तेषामवगुणानां परिहरणे समर्थाँ भवेत्। ते च केचन दोषाः ये छात्रेषु न स्युः । स्वच्छन्दत्वं धनार्थित्वं प्रमभावस्य भोगिता । अविनीतत्वमालस्यं विद्याविधकराणि षड् । सुभाषित। श्रीमद्भगवद्गीतोपनिषद्यपि एतादृशाः श्लोकाः प्राचुर्येण प्राप्यन्ते । यथा- 'तद्विद्धिप्रणिपातेन.....।। श्रद्धावान् लभते ज्ञानं । इत्यादयः । तेषामेवात्र विस्तरेण विवेचनं विधास्यामः । येन शिक्षायाः शिष्यसम्बन्धयः सम्प्रत्ययाः स्पष्टाः भवेयुरिति ।

**१. छात्रगुणपरकान्युद्देश्यानि -**

**International Journal of Research in Social Sciences**
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

श्रीमद्भगवद्गीतायाम् अनेके छात्रगुणसम्बद्धा: श्लोकाः प्राप्यन्ते । छात्रेण कथं भाव्यम् छात्रोचितमाचरणं किमिति अनेकानां प्रश्नानां समाधानं गीतायां मिलति । यथा-

**अभयं सत्वसंशुद्धिज्ञानयोगव्यवस्थितिः । दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ।।**

**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् । दयाभूतेष्यलोलुप्त्वं मार्दवं हीरचापलम् ।।**

**तेजः क्षमा धृतिः शोचमद्रोहो नातिमानिता । भवन्ति सम्पदं देवीमभिजातस्य भारत ।। " गीता १६.१-३**

अर्जुनमुपदिशता श्रीकृष्णेनोक्तं यत् छात्रेण सर्वगुणसम्पन्नेन भाव्यं । तात्पर्यमिदं यत् छात्रेषु वीरता, अभयं स्यात् । सत्वान्वेषणे स तत्परः भवेत् । तस्मिन् ज्ञानस्य योगस्य चावस्थितिः स्यात् । यच्छास्त्रं तेनाधीतं तच्छास्त्रं स अन्येभ्योऽपि दद्यात् । दम-यज्ञ-स्वाध्याय-तप आर्जव-अहिंसा-सत्य-अक्रोध-त्याग-शान्ति- अपशुन- भूतेषु दया- अलोलुप्त्व इत्यादीनां गुणानां शिष्ये छात्रे वा स्थितिः स्यात् । क्षमा-धृति-शौच-नीत्यादीनां गुणानामपि तस्मिन् प्रत्यहं विकासः स्यात्। एतादृशः देवीसम्पद्भिः युक्त एव शिष्यः श्रेष्ठशिष्यत्वपदं धारयति । वासुदेवेनोक्तं यद्यः शिष्यः इन्द्रियाणि मनसा नियम्य, कर्मेन्द्रियैः कर्मयोगमारभते स एव वास्तविकः शिष्यः। यथा-

**यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन । कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते।। गीता ३.७**

इन्द्रियाणां नियमनेन सहैव शिष्ये एषोऽपि गुणः स्याद् यत् स ब्रह्मचारी अपि स्यात् यतः "मरणं बिन्दुपातेन जीवनं बिन्दुरक्षणाद्" । अतएव भगवता उक्तम्- **प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः । मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ।। गीता ६.१४**

छात्रः धृतिगृहीतया बुद्धया शनैः शनै उपरमेत् तथा चात्मसंस्थं मनः कृत्वा स्वविषयेन ज्ञानेन वा विना किञ्चिदपि न चिन्तयेत्। छात्रस्य परमोद्देश्यं भवति, ज्ञानार्जनम् अतः स ज्ञानार्जनलक्ष्यं विहाय न कस्यचिदपि अन्यस्यविषयस्य चिन्तनं कुर्यात् । अत एवोक्तं भगवता - **शनैः शनैरुपरमेद् बुद्धया धृतिगृहीतया । आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ।। गीता ६.२५**

अर्जुनः कृष्णं पृच्छति यत् एतन् मनः चञ्चलमस्ति, अस्य स्थिरत्वं कठिनं तदा श्रीकृष्णः कथयति

**यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् । ततस्ततो नियम्येतदात्मन्येव वशं नयेत् ।। गीता ६.२६**

**अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् । अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय।। गीता १२.९**

छात्रस्य ज्ञानात्मकविकासाय ज्ञानार्जनमावश्यकं तथा ज्ञानार्जनाय मनसः निग्रह अपेक्षितः । अतः मनसः नियन्त्रणाय चञ्चलं मनः यत्र कुत्रापि गच्छति छात्रेण तत्र तत्र गत्वा तस्योपरि नियंत्रणं करणीयम् । कार्यमिदञ्च झटिति न सम्भवति । तदर्थं कृष्णः कथयति यत् स्थिररूपेण मनसः

International Journal of Research in Social Sciences
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

नियन्त्रणाय अभ्यासः परमावश्यः । एतस्सर्वरपि श्लोकः बालकस्य गुणविकासोद्देश्यानि स्पष्टानि भवन्ति । गीतायामत्र छात्रकरणीयस्य कार्यस्य कर्तव्यस्य चात्र सम्यगुल्लेखः वर्तते ।

**२. छात्रदोषनिवारणोद्देश्यानि-**

छात्रेषु ते के गुणाः भवेयुर्येन ते स्वजीवनस्य परमं लक्ष्यं प्राप्नुयुः इत्यस्माभिः पूर्वचिन्तितन्तं किन्तु गुणानां सहैव दोषाणामपि ज्ञानमावश्यकम्। यतः यावत्वयं कस्यापि विषयस्य द्वयमपि पक्षं न पश्यामस्तदा पूर्णतः साफल्यं न वाप्यतेऽस्माभिरिति ।

शिष्यदोषान्वर्णयता भगवता श्रीकृष्णेनोक्तं यत्-

**अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति । नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ।। गीता ४.४०**

शिष्य अज्ञः न स्यान्नाम स यदि कमपि विषयं पठति चेत् तस्य विषयस्य सम्प्रत्ययाः तस्य मनसि स्पष्टाः स्युः । ज्ञानार्जनेन सहैव तस्मिन् ज्ञाने ज्ञानदातरि च श्रद्धा स्यात् । कमपि विषयं प्रति तस्य मनसि संशयः न स्याद्, यदि स्याच्चेत् गुरुरूपदेशेन संशयं शमयेत्। यदि एभिर्दोषैर्युक्तः कञ्चन वर्तते चेत् तस्य सुखं नास्ति ।

**३. विनम्रतायाः उद्देश्यानि-**

वस्तुतः स छात्र, छात्रः नास्ति यस्मिन् विनम्रता नास्ति यतः शिक्षायाः एकं प्रमुखं कर्म विनम्रशीलबालकानां निर्माणमस्ति । तच्च "विद्या ददाति विनयं " इत्यनेन सिद्धत्येव । एतस्मिन् परिप्रेक्ष्ये गीतायामप्युक्तमस्ति-

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः ।। गीता ४.३४**

**श्रद्धावान्लभते ज्ञानं तत्परः संयतेन्द्रियः । ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।। गीता. ४.३९**

ज्ञानार्जनं किञ्चन सरलकार्यं नास्ति। अतः भगवतोक्तं यत् तज्ज्ञानं गुरूणां प्रणिपातेनावगच्छतु तथा च केवलं प्रणिपातेनैव ज्ञानं भविष्यति इत्यपि नास्ति, तदर्थं प्रश्न: प्रतिप्रश्न: परिप्रश्नश्च करणीयः । सेवाशुश्रूषया ज्ञानेन सहैव गुरूणामाशीर्वादोऽपि प्राप्तव्यः । यतः गुरूणामाशीर्वादं विना प्राप्तं ज्ञानमात्मन् विहीनशरीरमिव भवति । यस्मिन् छात्रे ज्ञानस्य गुरोश्च कृते श्रद्धा भवति स एव छात्र: ज्ञानमाप्तुं सक्षमः । अनन्तरं छात्रस्य नियत्रणं तस्य इन्द्रियेषु भवेत् । स स्वेन्द्रियेषु तादृशमनुशासनं स्थापयेत्, यान्येन्द्रियाणि आत्मननुगामीनि भवेयुः ।

अर्जुनः विश्वेऽस्मिन् प्रसिद्धस्य गीतायाः ज्ञानस्य प्राप्तिं कथमकरोत् ? इत्यस्य उत्तररूपेण वाक्यमेकमागच्छति यत् स विनम्र आसीदतः सः गीताज्ञानप्राप्तौ समर्थः जातः । एतस्य ज्ञानाय तेन विनम्रतासहिता प्रार्थना कृता भगवतः श्रीकृष्णस्य । यथा-

**कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः ।**

**यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।। गीता. १.७**

सर्वस्मिन् जगति भगवतः विराटस्वरूपस्य दर्शनं दुर्लभमस्ति । तच्च दर्शनं सोऽर्जुनः कृतवान् इत्यत्रापि विनम्रमता, अनुशासनं, श्रद्धा एव कारणानि । यतस्तेन तदर्थं विनम्रप्रार्थना कृता, तच्च दर्शनं विनम्रताया एव फलम्। यथा-

**मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ।। गीताः १२.९**

**४. गुरुसम्मानभावनोत्पादनस्योद्देश्यानि -**

गीतायां तादृशानि वाक्यानि सन्ति येभ्यः बालकः गुरुं प्रति सम्मानं विधेयमिति शिक्षते । गीतायाः द्वितीय एव श्लोक उदाहरणोस्ति- **...आचार्यमुपसंगम्य राजा वचनमब्रवीत् । गीता १.२**

अत्र क्रूरोऽपि दुर्योधनः गुरुसम्मानाय स्वस्थानाद् अवतीर्थ गुरुमुपगतः । स राजा आसीत् दूरादपि निर्देशादीनां दाने स समर्थ आसीत्। तथापि परम्परामनुपालयन् स आचरणमिदमाचरत् ।अर्जुनस्यापि गुरुभक्तिः प्रसिद्धैव । यदा स रणाङ्गणे युद्धकाङ्गिणः गुरुन् दृष्टवान् तदा तस्य हस्ताभ्यां धनुषः पतितः तथा च तेनोक्तम्-

**गुरूनहत्वा हि महानुभावाञ्छ्रेयो भोक्तुं भैक्ष्यमपीह लोके ।**

**हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान् ।। गीता: १.५**

**५. कृतज्ञताभावज्ञापनोद्देश्यानि -**

गुरुः शिष्यमुपकरोति, अतः शिष्यस्य परमं कर्तव्यं यत् स प्राप्तोपकाराय कृतज्ञताभावं प्रदर्शयेत् तथा च ज्ञानस्येदमुद्देश्यं यत्तदीमान् भावान् प्रपूरयेत् । गीतायां भगवता श्रीकृष्णेनार्जुनाय विभिन्नप्रकारकाः ज्ञानोपदेशाः कृताः, तदनु तस्य ज्ञानस्य प्राप्त्यनन्तरं सः कृष्णाय कृतज्ञतां प्राकटयत् । यथा-

**मदनुग्रहाय परमं गुह्यमध्यात्मसञ्जितम् । यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ।। गीता. ११.१**

**नष्टो मोह: स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत । स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ।। गीता. १८.७३**

छात्रस्येदं परममुद्देश्यमस्ति यत् सोपकारं दत्तस्य गुरुज्ञानस्य कृते स कृतज्ञतामर्पयेत्। तेन ज्ञानदातरि गुरौ अपि कञ्चन सन्तोषो जायते।

**।। इति शम् ।।**

**International Journal of Research in Social Sciences**
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A